योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः १११

अज्ञातलेखकः

एकादशाधिकशततमः सर्गः १११

श्रीवसिष्ठ उवाच ।

इति कल्पान्तसदृशे यत्ते समरसंभ्रमे ।

पतन्तीषूत्पतन्तीषु सेनासु समरेजिरे ।। १

तूर्यभेरीमहाशङ्खखङ्गेषु खे नदत्सु च ।

धनुर्ध्वनिषु वीराणां तारक्रेंकारकारिषु ।। २

अन्योन्यकठिनास्फोटविकटे भटपेटके ।

कवत्कटकटाटोपे कटुकुट्टितकङ्कटे ।। ३

किंचित्प्रभज्यमानासु विशत्कश्मासु संगरे ।

विपश्चित्पक्षसेनासु लूयमानलतास्विव ।। ४

उदभूत्पूरयन्नाशा नृपनिर्याणदुन्दुभिः ।

चतुर्धाशनिसंपूर्णकल्पाभ्ररवमांसलः ।। ५

स्फुटतां कुलशैलानां तुल्यकालमिवोत्कटः ।

स्फुटच्चटचटास्फोटैर्जडिताखिलदिक्तटः ।। ६

लोकपालैरिवाकारैर्नारायणभुजैरिव ।

स चतुर्भिश्चतुर्दिक्कं निर्जगाम महीपतिः ।। ७

चतुरङ्गेण महता सैन्येन परिवारितः ।

अट्टालवलयात्कृच्छ्रान्निर्गत्य नगराद्बहिः ।। ८

ददर्शात्मबलं रिक्तं बलवद्रिपुमण्डलम् ।

गर्जन्तं च लयाकृत्या भीमं युद्धोद्धतार्णवम् ।। ९

शरसीकरनीरन्ध्रं मकरव्यूहसंकुलम् ।

वारणव्यूहवलितं तरङ्गव्यूहविस्तृतम् ।। १०

चक्रावर्तवहद्व्यूहकल्लोलकलितान्तरम् ।

चलद्रथशतावर्तं पताकालहरीगणम् ।। ११

प्रस्फुरच्छत्रफेनाढ्यं हयहेषितफीत्कृतम् ।

समुल्लसद्धेतिजलं कचद्धाराकरं परम् ।। १२

तरत्तरलमातङ्गतुरङ्गौघतरङ्गकम् ।

हेत्यम्भसि कचत्पापमुद्यद्गुलुगुलोदरम् ।। १३

दरीदलनसंक्षुब्धमरुज्जनितघुंघुमम् ।

नतोन्नतकृताद्रीन्द्रमहास्पन्दशरीरकम् ।। १४

मज्जन्मातङ्गतुरगहेलाहतमहीधरम् ।

अपारविचरत्पूरकल्लोलालमहाजलम् ।। १५

अकालकल्पान्तदशासमुत्थानघनाकृतिम् ।

आक्रान्तरोदसीरन्ध्ररुधिरैकमहार्णवम् ।। १६

कचदायुधखण्डौघडीनरत्नावृतोदरम् ।

चलद्व्यूहचलट्यस्तयन्त्राश्मक्षेपणाश्मकम् ।। १७

रत्नसीकरनीहारसंध्याभ्रपटलानतम् ।

क्वचित्पांसुपयोवाहपीतहेतिपयोधरम् ।। १८

तमालोक्य रणाम्भोधिमगस्त्योऽस्य भवाम्यहम् ।

इति संचिन्त्य मनसा स पातुं तं रणार्णवम् ।। १९

अस्त्रं सस्मार वायव्यं चतुर्दिक्कं च संदधे ।

धनुषि शिखराधारे त्रिपुरान्त इवोद्यतः ।। २०

आत्मीयदेशसैन्यानां श्रेयोर्थं शान्तयेऽनलम् ।

नमस्कृत्याथ जप्त्वाशु स तत्त्यज दारुणम् ।। २१

यथा तथैव तत्याज तस्य साहायकाय सः ।

पर्जन्यास्त्रं महास्त्रैशं द्विषदातपशान्तये ।। २२

तस्मादस्त्रजुषो घोराद्धनुषः परिनिर्गताः ।

अष्टमूर्तेश्चतुर्दिक्कमाशाकुहरपूरकाः ।। २३

निर्ययुर्बाणसरितस्त्रिशूलसरितस्तथा ।

शक्तीनामुग्रसरितो भुशुण्डीसरितस्तथा ।। २४

मुद्गराणां च सरितः प्रासानां सरितो रयात् ।

चक्राणां चैव सरितः परश्वधनदीरयाः ।। २५

तोमराणां च सरितो भिन्दिपालमहापगाः ।

पाषाणानां च सरितो वाताः कल्पान्तशंसिनः ।। २६

अशनीनां च सरितो विद्युतां सरितस्तथा ।

जलधारासरित्पूराः खड्गवर्षसमन्विताः ।। २७

सनाराचा महावर्षहर्षलोत्पातपीवराः ।

नागाश्च युगपर्यन्तस्फुटिताद्रीन्द्रजा इव ।। २८

तेनास्त्रवर्षवेगेन धुतः सोऽरिबलार्णवः ।

झटित्येव न कालेन पांसुराशिरिवाभितः ।। २९

सलिलाशनिशस्त्राणामासारैश्चण्डमारुतैः ।

सरांसीव विसेतूनि सैन्यानि परिदुद्रुवुः ।। ३०

चतुरङ्गश्चतुर्दिक्कं बलौघः स पराङ्मुखः ।

ययौ प्रावृङ्गिरिणदीमहावाह इव द्रुतः ।। ३१

वहत्स्विन्नबृहच्छिन्नपताकाकेतुपादपः ।

मरीचिपुष्पशबलविलोलासिलतावनः ।। ३२

विलुठत्पुष्टपाषाणपृषद्रक्तद्रवावचः ।

घोरैर्घुरघुरारावैरलं हृदयभङ्गदः ।। ३३

उह्यमानवृहद्दन्तिदन्तद्रुमविघट्टनैः ।

स्फूर्जच्चटचटारावतर्जितोद्गर्जिताम्बुदः ।। ३४

हेतिवृत्तोग्रसंघट्टपुष्पजातझणज्झणः ।

तरत्तरलसारावतुरङ्गमतरङ्गकः ।। ३५

रथादिभटचक्रौघशिलाक्रेंकारपीवरः ।

पदातिरथहस्त्यश्वशिलासंघट्टसंकटः ।। ३६

कटुचंकारचीत्कारक्रेंकारपरिपीवरः ।

मृता मृता वयमिति घनकोलाहलाकुलः ।। ३७

सेनावारिमहावर्तचलद्गुलुगुलारवः ।

रक्तसीकरनीहारसंध्याम्बुदवितानकः ।। ३८

हेतिवीचिवटाच्छिन्नवारिवामनवारिदः ।

वर्षपङ्किलभूपीठतटखण्डनमण्डितः ।। ३९

कुन्तशूलगदाप्रासवहत्तालतलाद्भुतः ।

साक्रन्दभीरुजनताप्रतपन्मृगपोतकः ।। ४०

मृतहस्त्यश्वयोधौघजीर्णपर्णनिरन्तरः ।

पिष्टदेहवसामांसपङ्कसंजातकर्दमः ।। ४१

चूर्णीकृतखुरापिष्टमहास्थिघनसैकतः ।

उह्यमानशिलापूरकाष्ठकोटिकटङ्कटः ।। ४२

उद्गर्जत्प्रलयाम्भोदैर्वहत्प्रलयवायुभिः ।

प्रपतत्प्रलयासारैः प्रलयाशनिसंकटैः ।। ४३

पङ्किलाखिलभूपीठैः सलिलोपप्लुतस्थलैः ।

सितशैत्यवशाश्यानधाराकृतखपञ्जरैः ।। ४४

समग्रनगरग्रामगृहज्वलितवह्निभिः ।

प्रजाश्वेभपदातीनामाक्रन्देनापि घर्घरैः ।। ४५

रथाम्भोधरनिर्ह्रादैर्दिवि भूमौ घनारवैः ।

चतुर्दिक्कं घनं तारक्रेंकारस्य चतुष्टयैः ।। ४६

विद्युद्वलयविस्तारकारिसंघट्टघर्षणैः ।

शरशक्तिगदाप्रासभिन्दिपालादिवर्षणैः ।। ४७

सर्वदिक्कमसंख्यानि बलानि बलशालिनाम् ।

भूभृतां विद्रवन्त्याशु विनेशुर्मशकौघवत् ।। ४८

उद्दामपावकवनोपमहेतिसार्थ-

मेघानलाकुलजनाशनिवर्षपातैः ।

आसन्बलानि चपलाब्धिजलाबलानि

पर्याकुलानि वडवाग्निमिवाविशन्ति ।। ४९

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मी० दे० मो० निर्वा० उ० वि० चतुर्दिग्गतबलद्रवणं नामैकादशाधिकशततमः सर्गः ।। १११ ।।